# Krishnastutih

# કૃષ્ણસ્તુતિઃ

## Document Information

Text title : Krishnastutih 2

File name : kRRiShNastutiH2vAdirAja.itx

Category : vishhnu, vAdirAja, vishnu, stuti, krishna

Location : doc_vishhnu

Author : vAdirAjayati

Proofread by : Jayalakshmi Jayaraman, Revathy R.

Latest update : May 26, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 26, 2024

*sanskritdocuments.org*

# કૃષ્ણસ્તુતિઃ

હિતં ન જાનામ્યહિતં ન જાને નાકર્તુમીશો નચ કર્તુમીશઃ ।
યથા નટાન્નાટકદારુયન્ત્રં તથા હરેઃ પ્રેરણયૈવ વર્તે ॥ ૧॥

યદભૂત્તદ્ધરેર્યચ્ચ નાભૂત્તચ્ચ હરેઃ પરાત્ ।
જીવો વિષ્ટિગૃહીતોઽસ્માત્કિં ભવેત્કિં ચ નો ભવેત્ ॥ ૨॥

કર્મણો યદિ તત્કર્મ સ્વાનિષ્ટં કુરુતે કુતઃ ।
અનાદ્યનિષ્ટકર્માણિ કરોત્યન્યવશો ધ્રુવમ્ ॥ ૩॥

નિત્યો જીવોઽસ્વતન્ત્રશ્ચેદનિત્યં કર્મ જન્મનિ ।
સ્થિતૌ લયે પરાપેક્ષમન્યાધીનં કથં ન તત્ ॥ ૪॥

યત ઇત્યેકવચનાદેકો દાધાર ચેત્યલમ્ ।
સ્પષ્ટશ્રુતેર્ન કર્માણિ કર્મદ્વારા ન ચેતનાઃ ॥ ૫॥

અનન્તાઃ સર્વજગતાં કર્તારો લાઘવાદપિ ।
લોકેઽદૃષ્ટદ્વારકર્તૃમાત્રાત્ક્વાપિ ક્રિયાજનેઃ ॥ ૬॥

કૃતિપૂર્વકકર્તૈવ કર્તાઽન્યસ્તૂપચારતઃ ।
અન્યથા કન્યકાયાઃ સ્યાદ્ભર્તાઽપિ પિતૃવત્પિતા ॥ ૭॥

અતો નામુખ્યકર્ત્રૈવ મહાકાર્યમિદં ભવેત્ ।
કિં સ્ત્રીપુંસોર્વિનાઽપિ સ્યાત્પુત્રઃ પુત્રેષ્ટિમાત્રતઃ ॥ ૮॥

ન ચેદુપાદાનમપિ તદ્વત્સ્યાદૌપચારિકમ્ ।
દૃષ્ટાનુસારતસ્તચ્ચેત્કર્તાઽપિ સ્યાત્તથૈવ હિ ॥ ૯॥

અદૃષ્ટમપિ બીજાદ્યં કલ્પ્યં ફલબલાદ્યથા ।
તથાઽદૃષ્ટોઽપિ કર્તાઽસ્ય કલ્પ્યઃ કોઽપ્યુરુશક્તિમાન્ ॥ ૧૦॥

ન ચ કાલાદિકં તસ્ય પ્રેરકં જડવસ્તુનઃ ।
સ્વતઃ પ્રવૃત્ત્યયોગેન પ્રેર્યત્વાત્કર્તૃતોઽન્યતઃ ॥ ૧૧॥

નાપિ તત્પ્રેરકો બ્રહ્મા નેશો નેન્દ્રોઽપરે કુતઃ ।
અઙ્ઘ્ર્યર્ચનેન તત્તીર્થજુષ્ટ્યા તદ્દત્તભૂત્વતઃ ॥ ૧૨॥

કિઞ્ચ સૃજ્યં વશે સ્રષ્ટુર્હાર્યં હર્તુર્વશે પરમ્ ।
પાતુર્વશે સ્થિતં સર્વમતો વિષ્ણોર્વશેઽખિલમ્ ॥ ૧૩॥

ન પિતાઽધિપતિર્નૄનાઁઅ ન હર્તા યામકોઽપિ વા । ??
કિન્તુ રક્ષક એવાતો વિષ્ણુરેવ જગત્પતિઃ ॥ ૧૪॥

દશદિક્પતિભાવેન દેવા બ્રહ્મેશપૂર્વકાઃ ।
ખણ્ડાધિપતયો વિષ્ણુસ્તદભાવાજ્જગત્પતિઃ ॥ ૧૫॥

અસ્ય દેવસ્યેતિ વેદે યથા વિષ્ણોર્વશે હરઃ ।
સ્પષ્ટં શ્રુતસ્તથા વેદે ન ક્વાપીશવશે હરિઃ ॥ ૧૬॥

શ્રૌતો લબ્ધપદઃ સોમો નેશો વેદવિદાં મતે ।
વિશ્વાધિકત્વગીઃ સાવકાશેન્દ્રાદિશ્રુતાવિવ ॥ ૧૭॥

સોઽરોદીદિતિ વેદે હિ રોદનાદ્રુદ્રતોદિતા ।
ન તે મહિત્વમિતિ તુ વિષ્ણોરસમતોદિતા ॥ ૧૮॥

યા હ્યુચ્છેષણભાગો વૈ રુદ્ર ઇત્યાહ વેદવાક્ ।
જુષેથાં યજ્ઞમિત્યાદ્યા સા વિષ્ણું વક્ત્યતસ્સ રાટ્ ॥ ૧૯॥

પ્રલયે વટપત્રેઽપ્સુ શેતે નારાયણઃ કિલ ।
તદા ક્વાન્યે સુરાસ્તસ્માત્સર્વેશો વિષ્ણુરેવ હિ ॥ ૨૦॥

કિઞ્ચ ગીતોપનિશદિ સર્વં દ્વિપુરુષાખ્યયા ।
સઙ્ગૃહીતં હરિસ્ત્વેકઃ પુરુષોત્તમ ઈરિતઃ ॥ ૨૧॥

રામઃ પ્રભૂરામભૃત્યા દેવાઃ સર્વેઽપિ વાનરાઃ ।
કૃષ્ણઃ પ્રભુઃ કૃષ્ણભૃત્યા દેવા ધર્માત્મજાદયઃ ॥ ૨૨॥

અર્હત્તમો હ્યગ્રપૂજામર્હત્યન્યો ન સંસદિ ।
યથેવેહ તથાઽમુત્ર તદ્વિષ્ણુરખિલપ્રભુઃ ॥ ૨૩॥

તસ્માત્સર્વેશ્વરો વિષ્ણુઃ સર્વં સર્વત્ર સર્વદા ।
પ્રવર્તયતિ સર્વત્ર સર્વશક્તિઃ સનાતનઃ ॥ ૨૪॥

યદ્ભૂતં ભૂતમેતસ્માદ્ભવચ્ચ ભવતિ પ્રભોઃ ।
ભાવ્યં ભવિષ્યતીહ્યસ્ય કૃપયા નાન્યતઃ ક્વચિત્ ॥ ૨૫॥

અતઃ સર્વેષ્ટલાભાય સર્વાનિષ્ટનિવૃત્તયે ।
તમર્ચ્યમર્ચય સ્તુત્યં સ્તુહિ નમ્યં નમાચ્યુતમ્ ॥ ૨૬॥

વાદિરાજયતિપ્રોક્તમેવં કૃષ્ણસ્તવં નવમ્ ।
પઠન્ સર્વેષ્ટમાપ્નોતિ સર્વાનિષ્ટનિવૃત્તિમાન્ ॥ ૨૭॥

ઇતિ શ્રીમદ્વાદિરાજપૂજ્યચરણવિરચિતા શ્રીકૃષ્ણસ્તુતિઃ સમ્પૂર્ણા ।

ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ।

Proofread by Jayalakshmi Jayaraman

---

*Krishnastutih*

pdf was typeset on May 26, 2024

Please send corrections to *sanskrit@cheerful.com*